षोड़शादौ विकारः स्यात् वर्णनाशः पृषोदरे ॥”
इति कलापपञ्जी ॥

निपानं, क्ली, (निपीयते अस्मिन्निति । नि+पा+ आधारे ल्युट् ।) कूपसमीपशिलादिनिबद्धपशुपानार्थजलकूपोद्धृताम्बुस्थानम् । इति भरतः ॥ तत्पर्य्यायः । आहावः । इत्यमरः । १।१०।२६॥ निपानकम् ३ । इति शब्दरत्नावली ॥ गोदोहनपात्रम् । इति त्रिकाण्डशेषः ॥ (जलाशयमात्रम् । यथा, विष्णुसंहितायाम् । ६४ । १ ।
“परनिपानेषु न स्नानमाचरेत् ॥”)

निपुणः, त्रि, (नि+पुण राशीकरणे+क ।) कार्य्यक्षमः । (यथा, नागानन्दे सूत्रधारोक्तिः ।
“श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी ॥”
अन्यच्च, देवीभागवते । १ । ५ । ५६ ।
“न ते रूपं वेत्तुं सकलभुवने कोऽपि निपुणो
न नाम्नां संख्या ते कथितुमिह योग्योऽस्ति पुरुषः ॥”)
तत्पर्य्यायः । प्रवीणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृतमुखः ८ कृती ९ कुशलः १० । इत्यमरः ।३।१।४॥ संख्यावान् ११ मतिमान् १२ कुशाग्रीयमतिः १३ कृष्टिः १४ विदुरः १५ बुधः १६ दक्षः १७ नेदिष्ठः १८ कृतधीः १९ सुधीः २० विद्वान् २१ कृतकर्म्मा २२ विचक्षणः २३ विदग्धः २४ चतुरः २५ प्रौढ़ः २६ वोढा २७ विशारदः २८ सुमेधाः २९ सुमतिः ३० तीक्ष्णः ३१ प्रेक्षावान् ३२ विबुधः ३३ विदन् ३४ । इति राजनिर्घण्टः ॥ विज्ञानिकः ३५ कुशली ३६ । इति शब्दरत्नावली ॥

निफला, स्त्री, (निवृत्तं फलं यस्याः ।) ज्योतिष्मती । इति भावप्रकाशः ॥ (ज्योतिष्मतीशब्देऽस्या गुणादयो व्याख्याताः ॥)

निफेनं, क्ली, (निवृत्तः फेनो यस्मादिति ।) अफेनम् । इति राजनिर्घण्टः ॥

निबद्धं, क्ली, (नितरां बद्धः तानलयादिसहितबन्धनं यत्र ।) गीतम् । इति शब्दरत्नावली ॥

निबन्धः, पुं, (निबध्नातीति । नि+बन्ध घञ् ।) आनाहरोगः । ग्रन्थस्य वृत्तिः । इति हेमचन्द्रः ॥ निम्बवृक्षः । इति जटाधरः ॥ बन्धनम् । यथा,—
“दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ॥”
इति श्रीभगवद्गीता ॥
(यथा, भागवते । ६ । २ । ४६ ।
“नातःपरं कर्म्मनिबन्धकृन्तनं
मुमुक्षतां तीर्थपदानुकीर्त्तनात् ॥”)

निबन्धनं, क्ली, (निबध्यतेऽनेनास्मिन् वा । नि+बन्ध ल्युट् ।) हेतुः । इति हेमचन्द्रः ॥ उपनाहः । स तु वीणातन्त्रीनिबन्धनोर्द्ध्वभागः । इत्यमरः । १ । ७ । ७ ॥ (नि+बन्ध+भावे ल्युट् ।) बन्धनञ्च ॥

निबन्धा, [ ऋ ] पुं, निबन्धकर्त्ता । ग्रन्थकर्त्ता । इति व्याकरणम् ॥

निबन्धितः, त्रि, बद्धः । निबन्धोऽस्य जातः इत्यर्थे इतच्प्रत्ययनिष्पन्नः ॥

निबर्हणं, क्ली, (निबर्हते इति । नि+बर्ह+ ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११२ ॥ (यथा, मार्कण्डेयपुराणे । ८२ । २२ ।
“युद्धेषु चरितं यच्च दुष्टदैत्यनिबर्हणम् ॥”)

निभः, त्रि, (नियतं भातीति । नि+भा+क ।) सदृशः । इत्यमरः । ३ । १० । ३८ ॥ (यथा, रघुवंशे । १० । ९ ।
“प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥”)
प्रकाशः । व्याजे, पुं । इति शब्दरत्नावली ॥

निभालनं, क्ली, (नि+भल+णिच्+भावे ल्युट् ।) दर्शनम् । इति त्रिकाण्डशेषः ॥

निभूतं, त्रि, (नि+भू+क्त ।) अतीतम् । भूतकालः । इति राजनिर्घण्टः ॥

निभृतः, त्रि, (नि+भृ+क्त ।) विनीतः । निर्जनः । यथा,—
“निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम् ।”
इति श्रीजयदेवः । २ । ११ ॥
(अस्तमयासन्नः । यथा, रघुवंशे । ८ । १५ ।
“नभसा निभृतेन्दुना तुला-
मुदितार्केण समारुरोह तत् ॥”)

निमज्जथुः, पुं, (नि+मस्ज+अथुच् ।) शयनम् । यथा, भट्टिः ।
“तल्पे कान्ताकरैः सार्द्धं मन्येऽहं धिङ्निमज्जथुम् ॥”

निमज्जनं, क्ली, (निमज्ज्यतेऽनेनेति । नि+मस्ज +भावे ल्युट् ।) स्नानम् । अवगाहनम् । यथा,
“नास्ति जन्यजनकव्यतिभेदः
सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनुमन्वतादा-
द्दृङ्निमज्जनमवैमि सुधायाम् ॥”
इति नैषधे पञ्चमसर्गः ॥

निमन्त्रणं, क्ली, (निमन्त्र्यते इति । नि+मन्त्र+ ल्युट् ।) नियोजनविशेषः । “अत्र यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम् । यथा, इह भुञ्जीत भवान् । यस्याकरणे प्रत्यवायो न स्यात् तदामन्त्रणम् । यथा, इह शयीत भवान् । इति निमन्त्रणामन्त्रणयोर्भेदः ।” इति मुग्धबोधटीकायां दुर्गादासः ॥

निमयः, पुं, (निमीयतेऽनेनेति । नि+मि+ “एरच् ।” ३ । ३ । ५६ । इत्यच् ।) विनिमयः । इत्यमरः । २ । ९ । ८० ॥ (यथा, महाभारते । १२ । ७८ । ७ ।
“पक्केनामस्य निमयं न प्रशंसन्ति साधवः ।
निमयेत पक्कमामेन भोजनार्थाय भारत ! ॥”)

निमिः, पुं, इक्ष्वाकुराजपुत्त्रः । तस्य निमेषे स्थितिकारणं यथा,—
“निमिर्नाम नृपः स्त्रीभिः पुरा द्यूतमदीव्यत ।
तत्रान्तरेऽभ्याजगाम वशिष्ठो ब्रह्मसम्भवः ॥
तस्य पूजामकुर्व्वन्तं शशाप स मुनिर्नृपम् ।
विदेहस्त्वं भवस्वेति शप्तस्तेनाप्यसौ पुनः ॥
अन्योन्यशापाच्च तयोर्विशरीरे विचेतसौ ।
जग्मतुः शापनाशाय ब्रह्माणं जगतः पतिम् ॥
अथ ब्रह्मण आदेशाल्लोचनेषु वसन्निमिः ।
निमेषाः स्युश्च लोकानां तद्विश्रामाय नारद ॥”
इति मत्स्यपुराणे ५५ अध्यायः ॥ * ॥
मतान्तरं यथा,—
“निमिः सहस्रसंवत्सरं सत्रमारेभे । वशिष्ठञ्च होतारं वरयामास । तमाह वशिष्ठः । अहमिन्द्रेण पञ्चवर्षशतं यागार्थं प्रथमतरं वृतः । आगतस्तवापि ऋत्विग् भविष्यामीत्युक्ते सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत् । समाप्ते चामरपतियागे त्वरावान् वशिष्ठ आजगाम । तत्कर्म्मकर्त्तृत्वं गौतमस्य दृष्ट्वा अयं विदेहो भविष्यतीति शापं ददौ । निमेः शरीरं सद्यो मृतमिव तस्थौ । यज्ञसमाप्तौ भागग्रहणायागतान् देवान् ऋत्विज ऊचुः । यजमानाय वरो दीयतामिति । देवैश्च छन्दितो निमिराह । नह्येतावति जगत्यन्यद्दुःखमस्ति यच्छरीरात्मनोर्वियोगे भवति । तदहमिच्छामि सकललोचनेषु वस्तुम् । न पुनः शरीरग्रहणं कर्त्तुमित्येवमुक्ते देवैरसावशेषभूतानां नेत्रेष्ववासं कारितः । ततो भूतान्युन्मेषनिमेषं चक्रुः ।” इति विष्णुपुराणे ४ अंशे ५ अध्यायः ॥

निमित्तं, क्ली, (नि+मिद्+क्त । संज्ञापूर्व्वकत्वान्न नत्वम् ।) हेतुः । (यथा, देवीभागवते ।१।१८।५।
“किं निमित्तं महाभाग ! निःस्पृहस्य च मां प्रति ।
जातं ह्यागमनं ब्रूहि कार्य्यं तन्मुनिसत्तम ! ॥”)
चिह्नम् । इत्यमरः ।३।३।७६॥ शकुनः । यथा,
“निमित्तानि च पश्यामि विपरीतानि केशव ! ।
इति श्रीभगवद्गीता ॥

निमित्तकं, क्ली, (निमित्त+संज्ञायां कन् ।) निमित्तनिश्चयादागतम् । चुम्बनम् । इति शब्दमाला ॥ निमित्तञ्च ॥

निमित्तकारणं, क्ली, (निमित्तं कारणम् ।) समवायिकारणासमवायिकारणाभ्यां भिन्नम् । तृतीयकारणम् । यथा । घटं प्रति कुलालदण्डचक्रसलिलसूत्रादि । इति भाषापरिच्छेदसिद्धान्तमुक्तावल्यौ ॥

निमित्तकृत्, पुं, (निमित्तं स्वरतेन शुभाशुभशकुनं करोतीति । कृ+क्विप् ।) काकः । इति राजनिर्घण्टः ॥

निमित्तवित्, [ द् ] पुं, (निमित्तं शुभाशुभलक्षणं वेत्तीति । विद्+क्विप् ।) दैवज्ञः । गणकः । इति हेमचन्द्रः । ३ । १४६ ॥

निमिषः, पुं, विष्णुः । यथा, महाभारते । १ । १४९ । ३६ ।
“निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥”
(निमिषतीति । नि+मिष+“इगुपधेति ।”